# Manobodha 2

# મનોબોધઃ ૨

## Document Information

Text title : manobodhaH 2 marAThI manAche shlokasya saMskRitAnuvAda

File name : manobodha-skt2.itx

Category : raama, samartha-rAmadAsa

Location : doc_raama

Author : Swami Ramdas, translator Vishvanath Keshava Chatre

Transliterated by : Sunder Hattangadi

Proofread by : Sunder Hattangadi

Description/comments : in Sanskrit by Chatre, verses for mind

Latest update : June 20, 2015

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 17, 2023

*sanskritdocuments.org*

# મનોબોધઃ ૨

મનોબોધઃ શ્રીસમર્થરામદાસસ્વામિવિરચિતઃ

સંસ્કૃત અનુવાદક વિશ્વનાથ કેશવ છત્રે

રામાપ્તિમાર્ગઃ

ગણાધીશમીશં ગુણાનામનન્તં   જગજ્જાતમેતદ્યતો નિર્ગુણં તમ્ ।
ચતુર્વાક્ખનિં શારદામ્બાં ચ વન્દે   સુદૃગ્ગોચરો મેઽસ્તુ રામાપ્તિમાર્ગઃ ॥ ૧॥

મનો! ભદ્ર! ભક્તેઃ પથૈવ પ્રયાયાત્   સ્વભાવાત્તતઃ શ્રીહરિઃ સ્યાત્ પ્રસન્નઃ ।
જનૈર્નિન્દિતં તત્ ત્યજેત્ સર્વથૈવ   જનૈર્વન્દિતં સર્વભાવેન કુર્યાત્ ॥ ૨॥

પ્રભાતે પ્રભુર્ધ્યાયતાં રામચન્દ્રો   ગિરા પ્રોચ્યતાં પાવનં રામનામ ।
સદાચારમત્યાજ્યમેવાચરન્ના   સુધન્યો ભવેદ્ભૂતલેઽસ્મિન્નવશ્યમ્ ॥ ૩॥

મનો! માઽસ્તુ દુર્વાસનાયા લવોઽપિ   મનો! મા સ્પૃશેત્પાપબુદ્ધિસ્તથા ત્વામ્ ।
મનો! મા ત્યજેત્ સર્વથા ધર્મનીતી   મનો! રેઽસ્તુ સારોદ્ધૃતૌ તે વિવેકઃ ॥ ૪॥

મનઃ! પાપસઙ્કલ્પમાશુ ત્યજ ત્વં   સમાશ્રીયતાં સત્યસઙ્કલ્પ એવ ।
મનો! વાસના માઽસ્તુ શબ્દાદિકેષુ   વિકારાભિભૂતં વિનિન્દન્તિ લોકાઃ ॥ ૫॥

મનો! માઽસ્તુ દુઃખાવહઃ ક્રોધ એષો   વિકારી ચ કામઃ પ્રકારૈરનેકૈઃ ।
મનો! ન શ્રયેત્પાપમૂલં ચ લોભં   વસેન્મત્સરાદ્દમ્ભદૈત્યાચ્ચ દૂરમ્ ॥ ૬॥

મનો! રેઽવલમ્બસ્વ ધૈર્યં પ્રસઙ્ગે   ગિરં મર્મભેત્રીમપિ ત્વં સહસ્વ ।
સ્વયં બ્રૂહિ રે! નમ્રવાચૈવ નિત્યં   મનસ્તોષય ત્વં તતઃ સર્વલોકાન્ ॥ ૭॥

સ્વદેહાવસાનેઽપિ જીવેત્ સ્વકીર્તિઃ   તથૈવ ક્રિયાં સન્મનો રે! કુરુષ્વ ।
ત્વયા ચન્દનેનેવ રે! સ્વક્ષયેણ   પ્રતોષોઽર્જિતવ્યસ્સતામન્તરાણામ્ ॥ ૮॥

મનઃ પુષ્યતાં મા પરાર્થેઽભિલાષો   હ્યતિસ્વાર્થબુદ્ધિર્મહાપાતકાય ।
ફલં પાપકૃત્યસ્ય ભોક્તાવ્યમેવા   ચિરેષ્ટં ન ચેલ્લભ્યતે, દુઃખમુગ્રમ્ ॥ ૯॥

અખણ્ડં મનો! રક્ષ્યતાં પ્રેમ રામે,   વિષાદં વિના પ્રાપ્તદુઃખં સહેત ।

સુખં મન્યતાં તત્, તનોર્યત્તુ દુઃખં   વિવેકેન ચ સ્થીયતામાત્મરૂપે ॥ ૧૦॥

ક આપ્નોતિ સર્વાણિ લોકે સુખાનિ?   વિચિન્ત્યેતિ રેઽન્વેષિતવ્યં ત્વયૈવ ।
કૃતં કર્મ યાદૃક્ પુરા હિ ત્વયૈવ   તથૈવોપભોક્તવ્યમસ્મિન્ શરીરે ॥ ૧૧॥

મનઃ! સન્તતં ચિન્તયેન્ન સ્વદુઃખં   મનઃ! શોકચિન્તે ત્યજેદ્ રે! સુદૂરમ્ ।
વિવેકેન સન્ત્યજ્યતાં દેહબુદ્ધિ-   ર્વિદેહેન રે! ભુજ્યતાં મુક્તિસૌખ્યમ્ ॥ ૧૨॥

ગતિઃ કાઽભવદ્ ભો મનો! રાવણસ્ય?   સરાજ્યં ત્વકસ્માદ્વિનાશં ગતોઽસૌ ।
ત્યજાતો દુરિચ્છાં મનઃ! શીઘ્રમેવ   ગ્રસિષ્ણુર્હિ કાલોઽનુધાવત્યખણ્ડમ્ ॥ ૧૩॥

તનું કર્મભિર્લબ્ધવાઞ્ જીવ એષઃ,   પરં સાપનીતા તુ કાલેન કાલે ।
મહાન્તોઽપિ મૃત્યોઃ પથૈવ પ્રયાતા   અસઙ્ખ્યાશ્ચ જાતા મૃતાશ્ચાપિ મહ્યામ્ ॥ ૧૪॥

ઇયં મર્ત્યભૂમિર્મનઃ ! સત્યદૃષ્ટ્યા,   સમસ્તાશ્ચ જીવા અહન્તાવદૃપ્તાઃ ।
ચિરઞ્જીવ્યશેષં ચ તે મન્યમાના,   અકસ્માત્ પરિત્યજ્ય સર્વં પ્રયાન્તિ ॥ ૧૫॥

અથૈકં મૃતં શોચતીહ દ્વિતીયસ્   તમન્વેત્યકસ્માદહો ! સોઽપિ શોચન્ ।
સુદુષ્પૂરલોભો મનઃક્ષુબ્ધતાયૈ,   સ આપ્નોતિ તસ્માત્ પુનર્જન્મ જીવઃ ॥ ૧૬॥

વૃથૈવોહ્યતે માનવેનેહ ચિન્તા,   ભવત્યેવ ભાવિ હ્યકસ્માત્ સમસ્તમ્ ।
નરો ભોગમાપ્નોતિ કર્માનુરૂપં,   વિષાદં શ્રયત્યલ્પધીસ્તદ્વિયોગાત્ ॥ ૧૭॥

વિના રામમન્યેન નાશા નિધેયા,   ન ગેયા ચ કીર્તિર્મનો ! માનવસ્ય ।
સ્તુતો યઃ પુરાણૈસ્તથા વેદશાસ્ત્રૈઃ,   સ્તવાત્તસ્ય સર્વે સ્તુતા ગૌરવાર્હાઃ ॥ ૧૮॥

મનઃ ! સર્વથા મા સખે ! પ્રોજ્ઝ સત્યમ્,   અસત્યં મનો ! મા પ્રતિષ્ઠાપયસ્વ ।
મનો ! રે વદેત્ સત્યવાચૈવ સત્યમ્,   અસત્યં ત્વસત્યં, મનઃ ! સન્ત્યજેત્તત્ ॥ ૧૯॥

ક્રિયાન્ રે ! ઽહહ ! ક્લેશદો ગર્ભવાસઃ,   પ્રરુદ્ધો મનઃ ! પચ્યતે તત્ર જીવઃ ।
અધોવક્ત્રજીવસ્ય દુઃખં મહત્તદ્-   મનો ! માસ્તુ તાદૃક્ષકૃચ્છ્રં પુનસ્તે ॥ ૨૦॥

મનો ! માસ્તુ જન્મપ્રસૂર્વાસના તે,   ન વા કામના દ્રવ્યદારાદિકાનામ્ ।
મનો ! યાતના દુઃસહા ગર્ભવાસે,   મનો ! ભદ્ર ! સમ્મેલય દ્રાક્ સરામમ્ ॥ ૨૧॥

મનઃ ! સજ્જન ! ત્વં હિતં મે કુરુષ્વ,   દૃઢં રાઘવં ધારયાન્તઃ સદૈવ ।
ત્રિલોકાધિપોઽસૌ હનૂમત્પ્રભૂશ્ચ   મહારાજ ઉદ્ધારકર્તા જનાનામ્ ॥ ૨૨॥

મનો ! બ્રૂહિ માઽન્યદ્ વિના રામકીર્તિં,   વૃથા ભાષણાન્નાસ્તિ રે ! સૌખ્યલાભઃ ।
હરત્યેષ તેઽનુક્ષણં કાલ આયુસ્-   તતસ્ત્વાં નુ કો મોચયેદ્ દેહપાતે ?॥ ૨૩॥

વિના રાઘવં કિં વૃથા ક્લેશિતવ્યં ?  પૃથગ્લોકવત્ કિં વૃથા જલ્પિતવ્યમ્ ? ।
મનો ! વાચિ તે રામાનામાસ્ત્વખણ્ડં,  ન સમ્બાધતાં ત્વામહન્તાઘરૂપા ॥ ૨૪॥

મનો ! ભદ્ર ! નોદ્વિજ્યતાં બોધનાન્મે,  કુતો રામલાભો ભવેદન્યથા તે! ।
અવશ્યં સમાયાતિ દુઃખં સુખાન્તે,  વિનઙ્ક્ષ્યત્યશેષં ચ કાલે સમસ્તમ્ ॥ ૨૫॥

કૃતા ભૂરિયત્ના વપૂરક્ષણાર્થં,  તદન્તે તુ કાલેન કાલેऽપનીતમ્ ।
ભજાનન્યભક્ત્યા રઘુશ્રેષ્ઠમેનં,  ત્યજાશેષચિન્તાં ચ સંસારજન્યામ્ ॥ ૨૬॥

ભવાત્ કિં વૃથા ભીરુવદ્ રે! બિભેષિ ?  ત્યજાશેષભીતિં ચ ધૈર્યં શ્રયસ્વ ।
સમર્થોऽન્તિકે રક્ષિતા રામ એષ,  ઉપેક્ષેત ન ક્રોધતમે કૃતાન્તે ॥ ૨૭॥

---

જહાત્યેષ દાસપ્રિયો નૈવ રામઃ

ધનુર્ધારિરામઃ સ રે! દીનનાથઃ  પુરો વીક્ષ્ય તં કમ્પતે ત્વન્તકોऽપિ ।
મનઃ સત્યમેતન્ન ભોઃ શઙ્કનીયં  જહાત્યેષ દાસપ્રિયો નૈવ રામઃ ॥ ૨૮॥

ત્રિલોક્યા તુ યન્નૂપુરં ગર્જતીવ  યદ્ 'અન્તે જયી રામદાસઃ સદૈવ' ।
અયોધ્યામશેષાં દિવં યો નિનાય  જહાત્યેષ દાસપ્રિયો નૈવ રામઃ ॥ ૨૯॥

સમર્થસ્ય દાસે ક્ષણં વક્રદૃષ્ટિં  ક ઉત્ક્ષેસ્તુમસ્યાં ક્ષિતૌ સ્યાત્ સુધૃષ્ટઃ ।
મુદા વર્ણ્યતે યસ્ય લીલા ત્રિલોકે  જહાત્યેષ દાસપ્રિયો નૈવ રામઃ ॥ ૩૦॥

મહાસઙ્કટેભ્યઃ સુરા યેન મુક્તા  ગુણી સર્વતો યો બલિષ્ઠઃ પ્રતાપી ।
સદા સ્મર્યતે યઃ શિવાશઙ્કરાભ્યાં  જહાત્યેષ દાસપ્રિયો નૈવ રામઃ ॥ ૩૧॥

અહલ્યા શિલારૂપતો યેન મુક્તા  પદસ્પર્શમાત્રેણ દિવ્યા કૃતા ચ ।
યયુર્વિક્લમં વર્ણને યસ્ય વેદા  જહાત્યેષ દાસપ્રિયો નૈવ રામઃ ॥ ૩૨॥

શશી ભાસ્કરસ્તારકા મેઘમાલા  વસન્તીહ યાવચ્ચ મન્દારમેરૂ ।
ચિરઞ્જીવિન્તાં યેન નીતૌ સ્વદાસૌ  જહાત્યેષ દાસપ્રિયો નૈવ રામઃ ॥ ૩૩॥

ઉપેક્ષા તુ સમ્ભાવ્યતે નૈવ રામાત્  પરં ચઞ્ચલં તન્મનો માનવસ્ય ।
પુરોવાચ યો 'ભક્તચિન્તા વહામિ'  જહાત્યેષ દાસપ્રિયો નૈવ રામ ॥ ૩૪॥

નરો યાદૃશં ભાવમન્તર્બિભર્તિ  વસત્યન્તરે તાદૃશસ્તસ્ય દેવઃ ।
અનન્યસ્ય યો રક્ષિતા ચાપપાણિઃ  જહાત્યેષ દાસપ્રિયો નૈવ રામઃ ॥ ૩૫॥

સમીપસ્થ એવાસ્તિ દેવઃ સદૈવ  કૃપાલુઃ પરીક્ષેચ્છુકસ્તુ ક્ષણૈકમ્ ।
સુસ્વાનન્દરૂપશ્ચ મોક્ષપ્રદો યો  જહાત્યેષ દાસપ્રિયો નૈવ રામઃ ॥ ૩૬॥

યથા પ્રત્યહં ચક્રવાકાર્થમર્કઃ   તથા ધાવતિ દ્રાક્ પ્રભુઃ સઙ્કટે યઃ ।
નદત્યમ્બરે ડિણ્ડિમો યસ્ય ભક્તેઃ   જહાત્યેષ દાસપ્રિયો નૈવ રામઃ ॥ ૩૭॥

મનઃ! સજ્જન! સ્થીયતાં રામરૂપે!

મનઃ! પ્રાર્થના મામિકેયં ત્વદગ્રે,   સદા રામમીક્ષસ્વ સાશ્ચર્યમેનમ્ ।
અવજ્ઞાયતાં મા ક્ષણં બોધ એષો,   મનઃ! સજ્જન! સ્થીયતાં રામરૂપે! ॥ ૩૮॥

પુરાણૈશ્ચ યો વર્ણ્યતે વેદશાસ્ત્રૈઃ,   સ્થિરં યસ્ય ભક્ત્યા સમાધાનસૌખ્યમ્ ।
ત્યજાશેષચાઞ્ચલ્યદોષં તમામું,   મનઃ! સજ્જન! સ્થીયતાં રામરૂપે! ॥ ૩૯॥

મનઃ! પ્રાપ્યતે યત્ર સૌખ્યં સમસ્તં,   વસાત્યાદરાત્તત્ર રે! સાવધાનમ્ ।
વિવેકેન દુષ્કલ્પના રે! નિરસ્ય,   મનઃ! સજ્જન! સ્થીયતાં રામરૂપે! ॥ ૪૦॥

ભ્રમિત્વા ભૃશં લપ્સ્યસે રે! ન સૌખ્યં,   શ્રમા નિષ્ફલાસ્તે, હિતં નાલ્પમાત્રમ્ ।
વિવેકેન રે! સ્વાન્તરં બોધયિત્વા,   મનઃ! સજ્જન! સ્થીયતાં રામરૂપે! ॥ ૪૧॥

અનેકૈઃ શ્રિતં માર્ગમેવાવલમ્બ્ય,   મનો! રામચન્દ્રં વશં સ્વં કુરુષ્વ ।
પ્રસિદ્ધઃ સ નાથો હિ દૈન્યાર્દિતાનાં,   મનઃ! સજ્જન! સ્થીયતાં રામરૂપે! ॥ ૪૨॥

મનઃ! સજ્જન! સ્મર્યતામેકમાત્રં,   હિતં પ્રાપ્યતામાત્મનીનં જનેષુ ।
વિના રામનામ્નો ન રે! ભાષિતવ્યં,   નિદિધ્યાસિતવ્યં સદા રામરૂપમ્ ॥ ૪૩॥

મનઃ! પાલયેત્ સર્વથાન્યત્ર મૌનં,   કથા વર્ણયેદ્રાઘવસ્યાદરેણ ।
ત્યજેદ્ધામ તદ્, યદ્ભવેદ્ રામહીનં,   સુખાવાપ્તયે સંશ્રયેદપ્યરણ્યમ્ ॥ ૪૪॥

સમાધાનભઙ્ગાય યોઽનિષ્ટસઙ્ગો,   યતોઽહન્તયાક્રમ્યસે ત્વં ત્વકસ્માત્ ।
મતિઃ પ્રેરિતા યેન રામં જહાતિ,   રુચિર્ હા! તદર્થં મહત્યેવ લોકે ॥ ૪૫॥

ક્ષણો નિર્ગતો યો વિના રામગાનં,   મનો વ્યર્થમાયુસ્ત્વયા તેન નીતમ્ ।
વૃથા સ શ્રમો, યો વિના રાઘવં સ્યાદ્,   હિતં શશ્વદાલક્ષતે નિત્યદક્ષઃ ॥ ૪૬॥

સુધન્યઃ સ દાસોઽસ્તિ સર્વોત્તમસ્ય

બહિઃ શ્રીહરિં વીક્ષતેઽન્તસ્તથા ચ   હરેર્જ્ઞાન્યપિ સ્નેહયુક્તઃ સુભક્તઃ ।
રતઃ કીર્તને સાધનં ચાનુતિષ્ઠન્   સુધન્યઃ સ દાસોઽસ્તિ સર્વોત્તમસ્ય ॥ ૪૭॥

સદા ક્ષીયતે યત્તનુર્દેવકાર્યે   સદા વર્તતે યન્મુખે રામનામ ।
સ્વધર્મસ્ય યઃ પાલને નિત્યદક્ષઃ   સુધન્યઃ સ દાસોઽસ્તિ સર્વોત્તમસ્ય ॥ ૪૮॥

સદૈવ ક્રિયા યસ્ય ભાષાનુરૂપા   અપશ્યત્યનેકેષુ દેવં ચ એકમ્ ।
ભજત્યપ્યશઙ્કો ગુણોપેતરૂપં   સુધન્યઃ સ દાસોઽસ્તિ સર્વોત્તમસ્ય ॥ ૪૯॥

વિકારીતિ ચિત્તેઽલ્પમાત્રોઽપિ કામો   યતિર્બ્રહ્મચારી તથોદાસવૃત્તિઃ ।
લવં નાવશિષ્ટસ્તમો નિત્યશાન્તઃ   સુધન્યઃ સ દાસોઽસ્તિ સર્વોત્તમસ્ય ॥ ૫૦॥

મદો મત્સરો નાથવા સ્વાર્થબુદ્ધિઃ   ન વા બાધતે યં ભવસ્યોપસર્ગઃ ।
સદા ભાષણં સ્વાદુ નમ્રઞ્ચ યસ્ય   સુધન્યઃ સ દાસોઽસ્તિ સર્વોત્તમસ્ય ॥ ૫૧॥

નયંસ્તત્ત્વચિન્તાનુવાદેન કાલં   વિવાદેન વાદેન દમ્ભેન શૂન્યઃ ।
સુખં બ્રહ્મ સમ્ભાષ્યતે યેન મૂલં   સુધન્યઃ સ દાસોઽસ્તિ સર્વોત્તમસ્ય ॥ ૫૨॥

ઋજુઃ સર્વદા સર્વલોકપ્રિયશ્ચ   વિવેકી તથા સત્યવાગ્યઃ સદૈવ ।
અસત્યા ન બહ્વર્થદા વા યદુક્તિઃ   સુધન્યઃ સ દાસોઽસ્તિ સર્વોત્તમસ્ય ॥ ૫૩॥

સદાઽરણ્યવાસી ચ તારુણ્યકાલે   ન જાલેન યો બધ્યતે કલ્પનાયાઃ ।
દૃઢો નિશ્ચયો નાવિચાલ્યશ્ચ યસ્ય   સુધન્યઃ સ દાસોઽસ્તિ સર્વોત્તમસ્ય ॥ ૫૪॥

ન દુષ્ટા દુરાશા લવાપ્યસ્તિ ચિત્તે   હરિપ્રેમતૃષ્ણાર્તમાસ્તેઽન્તરં ચ ।
ઋણી શ્રીહરિર્યેન ભક્ત્યા કૃતશ્ચ   સુધન્યઃ સ દાસોઽસ્તિ સર્વોત્તમસ્ય ॥ ૫૫॥

મનઃ કોમલો યોદયાલુશ્ચ દીને   કૃપાલુસ્તથા વત્સલો દાસપાતા ।
કુતઃ કોપસન્તાપલેશોઽન્તરે સ્યાત્?   સુધન્યઃ સ દાસોઽસ્તિ સર્વોત્તમસ્ય ॥ ૫૬॥

---

નિષ્કામભક્તિઃ વાદવિરોધિતા ચ

મનઃ! પ્રાપ્યતાં ધન્યતા રામનામ્ના,   વ્રતોપાસનાદીનનુષ્ઠાય સમ્યક્ ।
ઉદાસીનતા તેઽસ્તુ સાધ્યં સદૈવ,   તતો વૃત્તિનિર્લેપતાં ભોક્ષ્યસે ત્વમ્ ॥ ૫૭॥

મનો! વાસના માસ્તુ ભોગેષુ તે, સા;   હ્યુદેત્યન્તરે પૂર્વકર્માનુસારમ્ ।
સદા ધ્યાયતાં કામમુત્સાર્ય રામો!   મનો માસ્તુ તે કલ્પનાલેશમાત્રમ્ ॥ ૫૮॥

મનઃ! કલ્પના ક્લૃપ્યતે કોટિશસ્તુ,   તતઃ સર્વથા લપ્સ્યસે રે! ન રામમ્ ।
મનો! ધારયન્ કામમત્યાદરેણ,   નરો નાપ્નુયાત્ પ્રેમ રામે કદાપિ ॥ ૫૯॥

મનઃ! કામધુક્, કલ્પવૃક્ષઃ સ રામઃ,   સ ચિન્તામણિઃ સર્વસારો નિધિશ્ચ ।
કથં તં સ્તુવીયામ્? હિ યસ્ય પ્રભુત્વં,   જગચ્છાસ્તિ, કિં તત્સમાનં યથાર્થમ્ ?॥ ૬૦॥

સ્થિતઃ કલ્પવૃક્ષસ્ય મૂલેઽપિ શોકં,   વહન્નન્તરે પ્રાપ્નુયાચ્છોકમેવ ।
સતાં સઙ્ગતૌ યો વસંસ્તત્ત્વવાદં,   વૃથા વર્ધયેત્તસ્ય દૈવે તુ શોકઃ ॥ ૬૧॥

નિદિધ્યાસને ખણ્ડિતે ત્વન્તરઙ્ગે, સમુત્તિષ્ઠતઃ શોકસન્તાપદુષ્ટૌ ।
સુખાનન્દ એત્યત્યયં ભેદબુદ્ધ્યા, વિષાદેન સન્નિશ્ચયો નાશમેતિ ॥ ૬૨॥

યથા કામધુક્ -સ્વામિના તક્રયાચ્ચા વિવાદસ્તથાત્માવબોધાલસેન ।
કરસ્થં તુ વિસ્મૃત્ય ચિન્તામણિં યશ્- ચિનોતિ શ્રમૈઃ કાચખણ્ડાન્ સ મૂઢઃ ॥ ૬૩॥

દૃઢો નિશ્ચયઃ સમ્ભવેન્નાતિમૂઢે, ન કામાતિસક્તસ્ય ચિત્તે ચ રામઃ ।
ભવેચ્ચાતિલુબ્ધોઽન્તરે ક્ષોભતમઃ, પ્રસક્તશ્ચ ભોગે સદા દૈન્યયુક્તઃ ॥ ૬૪॥

મનો! માસ્તુ તે જીવનં ભક્તિહીનં, સદૈન્યં; સ દુઃખી મહાન્ યોઽતિમૂઢઃ ।
મનઃ! સાદરં ધારય પ્રેમ રામે ન ધામેચ્છહેમ્નોઽપિ રે! રામશૂન્યમ્ ॥ ૬૫॥

અસારઃ સ સંસાર ઉગ્રાધિપૂર્ણો, મનો! ઽન્વિષ્યતાં હે સખે! સત્યમેતત્ ।
કુતઃ સૌખ્યલાભો વિષપ્રાશનેન! મનો! રાઘવધ્યાનસૌખ્યે રમસ્વ ॥ ૬૬॥

---

પ્રભાતે પ્રભુર્ધ્યાયતાં રામચન્દ્રઃ

ઘનશ્યામ-રામઃ સ લાવણ્યમૂર્તિઃ પ્રતાપી મહાન્ ધૈર્યમેરુર્ગભીરઃ ।
વિપત્તૌ સ્વદાસાન્ સ રક્ષત્યવશ્યં પ્રભાતે પ્રભુર્ધ્યાયતાં રામચન્દ્રઃ ॥ ૬૭॥

બલિષ્ઠં ધનુર્ધારિ-રામં વિલોક્ય કરાલઃ કૃતાન્તોઽપિ કમ્પં પ્રયાતિ ।
તદગ્રે નરો દુર્બલઃ કિં નુ કુર્યાત્? પ્રભાતે પ્રભુર્ધ્યાયતાં રામચન્દ્રઃ ॥ ૬૮॥

સુખાનન્દદં સર્વભીનાશનં ચ ભજેદ્ ભક્તિભાવેન રામં સદૈવ ।
વિવેકેન જહ્યાચ્ચ દુર્વર્તનેચ્છાં પ્રભાતે પ્રભુર્ધ્યાયતાં રામચન્દ્રઃ ॥ ૬૯॥

જપેદ્ધઃ સદા કામદં રામનામ ન બાધેત તં ભક્તમાપત્ કદાપિ ।
મદં સર્વમાલસ્યમપ્યાશુ જહ્યાત્ પ્રભાતે પ્રભુર્ધ્યાયતાં રામચન્દ્રઃ ॥ ૭૦॥

દહેદ્ ઘોરદોષાન્ ક્ષણે યસ્ય નામ નયેત્ સદ્ગતિં માનવં યસ્ય નામ ।
ભવેત્પુણ્યરાશિસ્તથા યસ્ય નામ્ના સ રામઃ પ્રભુર્ધ્યાયતાં સુપ્રભાતે ॥ ૭૧॥

ન તુ ક્ષીયતે સઞ્ચિતાર્થોઽશતોઽપિ મનો! ન શ્રમો નામઘોષે લવોઽપિ ।
’મહાઘોરસંસારશત્રું’ વિજેતું પ્રભાતે પ્રભુર્ધ્યાયતાં રામચન્દ્રઃ ॥ ૭૨॥

મહદ્દુઃખદો દેહદણ્ડસ્ય માર્ગઃ પરં રામનામ્નો જપો દુઃખહારી ।
સ્વયં શઙ્કરો ધ્યાયતે દેવદેવં પ્રભાતે પ્રભુર્ધ્યાયતાં રામચન્દ્રઃ ॥ ૭૩॥

અનેકાનિ વિઘ્નાનિ યોગાદિકેષુ વ્રતોદ્યાપનાદ્યર્થમર્થસ્ત્વવશ્યઃ ।
દયાલુઃ સ દીનેષ્વતો ધ્યાયતાં રે! પ્રભાતે પ્રભુર્ધ્યાયતાં રામચન્દ્રઃ ॥ ૭૪॥

જપો રામનાન્તોઽગ્રણીઃ સાધનાનાં   ન ચેદ્ જ્ઞાયતે, મૃગ્યતાં ચિન્તનેન ।
વૃથા સંશયસ્ત્યાજ્ય એવાસ્તિ સદ્યઃ   પ્રભાતે પ્રભુર્ધ્યાયતાં રામચન્દ્રઃ ॥ ૭૫ ॥

ક્રિયા દુષ્કરા નૈવ ધર્મો ન યોગો   ન ભોગોઽખિલસ્ત્યાગ ઉક્તસ્ત્વવશ્યઃ ।
દૃઢં વિશ્વસેનાન્નિ વક્તીતિ 'દાસઃ'   પ્રભાતે પ્રભુર્ધ્યાયતાં રામચન્દ્રઃ ॥ ૭૬ ॥

---

રામવિશ્વાસઃ

પ્રજાયેત નિષ્કામતા રામકામાત્,   તતો જીવમાત્રે પ્રતીયેત રામઃ ।
ગુણાન્ રામચન્દ્રસ્ય સપ્રેમ ગાયન્,   ભવેદ્ દ્વન્દ્વમુક્તો નરઃ શ્રદ્દધાનઃ ॥ ૭૭ ॥

ન યો વિશ્વસિત્યાદરાદ્રામચન્દ્રે,   વરાકો નરઃ સર્વશઃ પીડ્યતેઽસૌ ।
અનાશ્રિત્ય ના મોક્ષદં સ્વામિનં તં,   વૃથા દેહસંસારચિન્તાં કરોતિ ॥ ૭૮ ॥

મનો! ઽન્તઃ પરિત્યજ્ય સંસારચિન્તાં,   દૃઢં ધ્યાયતાં પાવનો રામચન્દ્રઃ ।
ભવઃ સત્ય આભાતિ મિથ્યાભ્રમેણ,   તતશ્ચાત્મરૂપસ્મૃતિર્લોપમેતિ ॥ ૭૯ ॥

દૃઢં ધાર્યતાં સ્વાન્તરે શ્રીહરિશ્ચ,   સુખં તીર્યતાં દુસ્તરોઽસૌ ભવાબ્ધિઃ ।
ન સઞ્ચિન્ત્યતાં સ્વોદરં દુર્ભરં તદ્,   મનો! હન્યતાં નિર્દયં મત્સરોઽસૌ ॥ ૮૦ ॥

---

નામસ્મરણમ્

મનો! નામ મા મત્સરેણ ત્યજ ત્વં,   પરં તજ્જપાખણ્ડમત્યાદરેણ ।
સમસ્તેષુ નામોત્તમં સાધનેષુ,   તુલાર્હં ન કિઞ્ચિત્ સખે! તેન લોકે ॥ ૮૧ ॥

તુલાર્હં ન નામાપરં રામનામ્ના,   પરં નેત્યભિજ્ઞાયતે દુર્ભગેણ ।
સ્વદાહોપશાન્ત્યૈ શિવસ્તત્ સિષેવે,   કથં પામરેણ ત્વસેવ્યં નરેણ? ॥ ૮૨ ॥

શિવશ્ચિન્તયન્ દગ્ધકામોઽપિ રામં,   શિવાયાઃ પુરસ્તં સ્તવીત્યાદરેણ ।
બહુજ્ઞાનવૈરાગ્યસામર્થ્યયુક્તે,   ત્વિયાનાદરો, મર્ત્યજીવે પુનઃ કિમ્? ॥ ૮૩ ॥

મહેશઃ સ મૂર્ધ્નોહ્યતે વિઠ્ઠલેન,   સ યં ધ્યાયતિ જ્ઞાયતેઽસૌ ન લોકૈઃ ।
સ્વયં શઙ્કરઃ શાન્તિમાપ્નોત્યદાહાત્,   પ્રમોક્તાન્તકાલે તુ જીવસ્ય રામઃ ॥ ૮૪ ॥

ઉપાસ્યઃ સ યોગેશ્વરારામરામો,   રમેતે જપે તસ્ય ગૌરી હરશ્ચ ।
સ્વયં ચન્દ્રમૌલિસ્તપસ્વી પ્રશાન્તઃ,   સ રામઃ પ્રભુર્વોઽન્તકાલે વિમોક્તા ॥ ૮૫ ॥

મુખે યસ્ય રામઃ, સ આપ્નોતિ નિત્યં,   સદાઽઽનન્દવિશ્રામપૂર્ણપ્રસાદમ્ ।
સશઙ્કુશ્રમાસ્તે વિના નામ વન્ધ્યા,   નિજં ધામ તત્પ્રાપયત્યાર્તિહીનમ્ ॥ ૮૬ ॥

જપન્ રામમાપ્નોતિ નો કામબાધાં,   સધૈર્યં તરત્યાપદઃ કીર્તયંસ્તમ્ ।
જયત્યુગ્રકામં બલી રામભક્તઃ,   સ ધન્યોઽવનૌ મારુતિર્બ્રહ્મચારી ॥ ૮૭॥

પ્રશસ્યં ભૃશં રાઘવસ્યાસ્ય નામ,   સુવાચ્યં મધુ સ્વલ્પમાસ્તે ત્વમૂલ્યમ્ ।
ધ્રુવં જન્મમૃત્યુદ્રુમોન્મૂલનાય,   સ એવ પ્રમોક્ષો મનો! માનવાનામ્ ॥ ૮૮॥

પ્રતિગ્રાસમીદૃગ્વદેદ્રામનામ,   તદુદ્ઘોષયેદાદરેણાસકૃચ્ચ ।
હરેશ્ચિન્તનેઽન્નં સદા ભક્ષયેચ્ચ,   સ્વભાવાત્તતઃ શ્રીહરિં પ્રાપ્યતેઽસૌ ॥ ૮૯॥

સ ખલ્વાત્મહા, વાચિ રામો ન યસ્ય,   ન તં માનયન્ ના વૃથા જીવતીહ ।
સ્તુતં નામ વેદૈશ્ચ શાસ્ત્રૈઃ પુરાણૈઃ,   સ્તુતં વ્યાસવાચાપિ ભૂયો નિતાન્તમ્ ॥ ૯૦॥

સમુદ્ધિજ્યતાં મા મનો! રામચન્દ્રાદ્,   મનઃ! પ્રોચ્યતાં તસ્ય નામાદરેણ ।
વિના મૂલ્યમેવોપલભ્યં મુખે તત્,   સમુદ્ઘોષ્યતાં જાનકીવલ્લભોઽસૌ ॥ ૯૧॥

સમુદ્ઘોષણાત્ સાદરં રામનામ્નો,   ગિરેર્ગહ્વરં પ્રદ્રવન્ત્યાશુ દોષાઃ ।
સ્વનામોપતિષ્ઠત્યનન્તઃ સુતુષ્ટો,   વિશેષેણ નામાતિલુબ્ધઃ શિવશ્ચ ॥ ૯૨॥

જગત્યન્નદાતા ય એકોઽસ્તિ દેવો,   વહત્યેષ નઃ સર્વસંસારચિન્તામ્ ।
અમૂલ્યં તુ તન્નામ સેવિષ્યસે ચેદ્,   મનસ્! તે ભવિષ્યત્યરે! કા નુ હાનિઃ? ॥ ૯૩॥

ત્રિલોકીં પ્રદગ્ધું ક્ષમઃ કોપિતો યઃ,   સ નામ્નાપ શાન્તિં શિવઃ ક્ષ્વેડદાહાત્ ।
જપત્યાદરાત્ પાર્વતી વિશ્વમાતા,   તદેવોચ્યતાં નામ તસ્માત્ સમસ્તૈઃ ॥ ૯૪॥

વદન્ પુત્રકામેન નારાયણેતિ,   પુરાઽજામિલઃ પાપકર્મા વિમુક્તઃ ।
શુકં શિક્ષયન્તીશનામાપિ વેશ્યા,   વિમુક્તા પુરાણે ગતા ચ પ્રસિદ્ધિમ્ ॥ ૯૫॥

કુલે દાનવાનાં કયાધોઃ સુપુત્રો,   જપન્નીશનામ સ્થિતોઽસૌ સદૈવ ।
સ દૈત્યાધિરાજઃ પિતા પાપકર્મા,   પ્રવિદ્વેષ્ટિ નામેત્યમૃષ્યન્ન પુત્રઃ ॥ ૯૬॥

કુતો નામહીનસ્ય રે! મુક્તિવાર્તા?   હ્યહઙ્કારદૃપ્તઃ સદા યાતનાભાક્ ।
સ દૈન્યાન્વિતો મૃત્યુરેષ્યત્યવશ્યં,   તતઃ પ્રોચ્યતાં પ્રોચ્યતાં દેવનામ ॥ ૯૭॥

શિલાસ્તારિતા નિશ્ચિતં રામનામ્ના,   મનસ્! તારિતા નાલ્પસઙ્ખ્યા મનુષ્યાઃ ।
નરઃ સર્વથા તત્ર ચાશ્રદ્દધાનઃ,   કદાપિ પ્રવર્તેત નો પાપરૂપઃ ॥ ૯૮॥

સુધન્યેહ વારાણસી પુણ્યરાશિર્,   દ્રુતં મોક્ષદા યાત્રિકાણાં પિતૃણામ્ ।
સુલભ્યં તુ તદ્ રામનામ્ના સુપુણ્યમ્,   ઇતીશઃ સદા બોધયન્ નૃભ્ય આસ્તે ॥ ૯૯॥

ન સમ્પદ્યતે કર્મ શાસ્ત્રોક્તરીત્યા,   કૃતં ચાઽયથોક્તં ન પુણ્યં તનોતિ ।
મનાગ્ નાનુકમ્પાઽન્તરે પ્રાણિનોઽર્થં,   મુખે નાસ્તિ તન્નામ મૂલ્યં વિનાપિ ॥ ૧૦૦॥

સશઙ્કશ્ચ યો નામ્નિ વિશ્વાસશૂન્યો, યમાદુગ્રદણ્ડં સ આપ્નોતિ, ધિક્! તમ્ ।
તતઃ સેવ્યતાં નામ રે। ऽત્યાદરેણ। તદુચ્ચારમાત્રાત્ ક્ષયં પાપમેતિ ॥ ૧૦૧॥

સદાત્યન્તનમ્રત્વમાશ્રિત્ય તોષો, મનઃ! સજ્જનાનાં ત્વયોપાર્જિતવ્યઃ ।
સદા ક્ષીયતાં સ્વીયદેહઃ પરાર્થે, ગુણાઢ્યઃ સદા સેવ્યતામાદરેણ ॥ ૧૦૨॥

મનોબોધઃ-ઉત્તરાર્ધઃ

ક્રિયાહીનવાચાલતા નિષ્ફલૈવ

સદા કીર્ત્યતાં રાઘવઃ સાનુરાગં મનઃ! કીર્તને લુપ્યતાં દેહબુદ્ધિઃ ।
પરસ્ત્રીપરાર્થાભિલાષશ્ચ હેયઃ, ત્વયા ભદ્ર! જીવાર્પણેનાપિ કાલે ॥ ૧૦૩॥

ક્રિયાહીનવાચાલતાં નૈકરૂપાં સદાऽતીવ નિર્ભર્ત્સયત્યન્તરઙ્ગમ્ ।
સદા સ્વૈરસઙ્કલ્પસંસક્તચેતાઃ કથં પ્રાપ્નુયાદ્ માનવો વિશ્વનાથમ્ ॥ ૧૦૪॥

વિવેકેન હિત્વા ક્રિયાં ગર્હણીયાં વિશુદ્ધાં સદૈવાનુતિષ્ઠાદરેણ ।
સદા તાત! વર્તસ્વ ભાષાનુસારં, ભવાર્તિપ્રદાં કલ્પનાં રે! જહીહિ ॥ ૧૦૫॥

વિવાદાન્તકારી હિ સંવાદ ઇષ્ટઃ

કુરુ સ્નાનસન્ધ્યાદિકર્મૈકનિષ્ઠં વિવેકેન ચ ભ્રંશનાત્ સ્વં નિયચ્છ ।
નરો ભૂતમાત્રે દયાસ્નેહયુક્તો હરેર્ભક્તિતઃ શાન્તિમન્તઃ પ્રયુઙ્ક્તે ॥ ૧૦૬॥

મનો રુધ્યતાં ક્રોધ ઉદ્ભૂતમાત્રો મનો! ધાર્યતામાદરઃ સાધુસઙ્ગે ।
મનસ્! ત્યજ્યતાં દુષ્ટપાપિષ્ઠસઙ્ગો મનો !ऽવાપ્યતાં તાત! મોક્ષાધિકારઃ ॥ ૧૦૭॥

મનો! નિત્યસઙ્ગાદ્ અરે! સજ્જનાનાં ક્રિયા તે વિશુધ્યેત જાયેત ભક્તિઃ ।
નિવર્તસ્વ રે! નિષ્ક્રિયોક્તેઃ સુશીઘ્રં વિવાદાન્તકારી હિ સંવાદ ઇષ્ટઃ ॥ ૧૦૮॥

વિવાદો વૃથા સર્વથા પ્રોજ્ઝિતવ્યઃ સુખાન્તશ્ચ સંવાદ એવાવલમ્બ્યઃ ।
મનઃ! સર્વદા શોકસન્તાપહારી વિવાદાન્તકારી હિ સંવાદ ઇષ્ટઃ ॥ ૧૦૯॥

નયેદ્વાદમન્તં સ સંવાદ ઉક્તો જયેત્ સ્વામહન્તાં વિવેકપ્રભાવાત્ ।
અહન્તાઢ્યવાદો વિકારોદ્ભવાય વિવાદાન્તકારી હિ સંવાદ ઇષ્ટઃ ॥ ૧૧૦॥

મયા તે હિતાયૈવ વક્તવ્યમેવં મનઃ! સત્યમન્વિષ્યતાં સ્વં હિતં ચ ।
હિતાયોદ્ધૃતં પ્રોજ્ઝ પાખણ્ડમેનં વિવાદાન્તકારી હિ સંવાદ ઇષ્ટઃ ॥ ૧૧૧॥

ગતં ભાષણૈરાયુરાકર્ણનૈશ્ચ   વિવાદસ્તુ તસ્થૌ યથાપૂર્વમેવ ।
મનો! દામ્ભિકઃ સંશયોત્પાદિ-વાદો   વિવાદાન્તકારી હિ સંવાદ ઇષ્ટઃ ॥ ૧૧૨॥

અહન્તાબલાદ્ હન્ત! વિદ્વદ્વરેણ્યાઃ   ક્રિયન્તો ગતા બ્રહ્મરક્ષઃશરીરમ્ ।
પરેશાન્મનઃ ! કોઽધિકો નામ વિદ્વાં-   સ્ત્વયા દ્રાગહન્તાવિહીનેન ભાવ્યમ્ ॥ ૧૧૩॥

મનો! મૌખિકો બ્રહ્મમાયાપ્રપઞ્ચઃ   કિમર્થમ્? સ તુ પ્રત્યહં ગર્વવૃદ્ધ્યૈ ।
ક્રિયાહીનવાચાલતા નિષ્ફલૈવ   વિચાર્યેતિ સત્યં સ્વયં મૃગ્યતાં તત્ ॥ ૧૧૪॥

વિવાદાન્તકારિસ્થલે બ્રૂહિ નિત્યં   વિવેકાદહન્તાં સુકાર્યે નિયુઙ્ક્ષ્વ ।
સદાવર્તનં તેઽસ્તુભાષાનુસારં   પથા ગચ્છ ભક્તેશ્ચ શુદ્ધક્રિયાભિઃ ॥ ૧૧૫॥

---

સ નોપેક્ષતે ભક્તમીશઃ કદાપિ

ઋષેઃ શાપતઃ પીડિતેઽત્યમ્બરીષે   તદર્થં મુદા યોઽગ્રહીન્નૈકદેહાન્ ।
દદૌ બાલકત્તાય યઃ ક્ષીરસિન્ધું   સ નોપેક્ષતે ભક્તમીશઃ કદાપિ ॥ ૧૧૬॥

સુદીનેન બાલેન ભક્તધ્રુવેણ   ય આર્તસ્વરાહૂત આવિર્બભૂવ ।
પદં સુસ્થિરં વ્યોમ્નિ તસ્મૈ દદૌ ચ   સ નોપેક્ષતે ભક્તમીશઃ કદાપિ ॥ ૧૧૭॥

ગજેન્દ્રેણ યઃ પ્રાર્થિતઃ પ્રાણકૃચ્છ્રે   પ્રધાવ્યાશુ નક્રગ્રહાત્તં રરક્ષ ।
પ્રદીર્ઘપ્રતીક્ષાર્તભક્તં દયાર્દ્રઃ   સ નોપેક્ષતે ભક્તમીશઃ કદાપિ ॥ ૧૧૮॥

યદાઽજામિલં પ્રાપ ઉગ્રઃ કૃતાન્તો   દયાર્દ્રેન પાપ્માપિ યેનોધૃતોઽસૌ ।
અનાથાશ્રયશ્ચક્રપાણિર્ય એકઃ   સ નોપેક્ષતે ભક્તમીશઃ કદાપિ ॥ ૧૧૯॥

વિધાતુઃ કૃતે યો બભૂવાશુ મીનઃ   સમુદ્ધર્તુમબ્ધેર્ધરિત્રીં ચ કૂર્મઃ ।
જનાર્થં વરાહોઽપ્યભૂન્નીચદેહઃ   સ નોપેક્ષતે ભક્તમીશઃ કદાપિ ॥ ૧૨૦॥

પિતૃક્લેશિતે ભૂરિ કાયાધવે હા !   નૃસિંહાકૃતૌ સ્તમ્ભતો યોઽવતીર્ણઃ ।
શિખા યન્મુખાગ્નેસ્ત્વસહ્યાઃ પ્રતીતાઃ   સ નોપેક્ષતે ભક્તમીશઃ કદાપિ ॥ ૧૨૧॥

કૃપાયાઃ પ્રસાદં યદેન્દ્રો યયાચે   તદર્થં દધારાકૃતિં વામનસ્ય ।
દ્વિજાન્ રક્ષિતું યોઽભવદ્ ભાર્ગવશ્ચ   સ નોપેક્ષતે ભક્તમીશઃ કદાપિ ॥ ૧૨૨॥

વને યન્નહલ્યાં મુમોચોગ્રશાપાત્   સુરાન્ યશ્ચ સર્વાન્ દશાસ્યસ્ય બન્ધાત્ ।
ત્રિલોકેઽનદદ્યદ્યશોર્ડિણ્ડિમશ્ચ   સ નોપેક્ષતે ભક્તમીશઃ કદાપિ ॥ ૧૨૩॥

ય ઉગ્રાપદિ દ્રૌપદીહ્રીં પ્રપાતું   વિહાય પ્રિયારાજ્યચિન્તામધાવત્ ।
કલૌ યોઽશ્રયદ્ બૌદ્ધરૂપં સમૌનં   સ નોપેક્ષતે ભક્તમીશઃ કદાપિ ॥ ૧૨૪॥

સ ભૂયોઽવતીર્ણઃ પ્રપાતું સુદીનાન્  અનાથાંશ્ચ, કલ્કિર્ભવિષ્યત્યવશ્યમ્ ।
યયુર્વિકલમં વર્ણને યસ્ય વેદાઃ  સ નોપેક્ષતે ભક્તમીશઃ કદાપિ ॥ ૧૨૫ ॥

---

સત્સઙ્ગે રામભક્તિઃ, રાઘવસ્ય પન્થાઃ નિર્ગુણબોધશ્ચ
ભુવં સાદરં યોઽવતીર્ણઃ સલીલં,  હ્યનેકેષુ વેષેષુ ભક્તાવનાર્થમ્ ।
ન તં યેઽભિજાનન્તિ સર્વેશ્વરં તે  દુરાત્માન ઉગ્રાઃ ખલાઃ પાપરૂપાઃ ॥ ૧૨૬ ॥

સુધન્યઃ સ યો રાઘવધ્યાનયોગાત્  પ્રશાન્તોઽન્તરે, તન્મયસ્તત્કથાયામ્ ।
ગતો રામબોધેન યદ્દેહભાવો  વિલીના ચ યદ્વાસના રામરૂપે ॥ ૧૨૭ ॥

મનો! વાસના વાસુદેવેઽસ્તુ સર્વા  મનઃ! કામના માઽસ્તુ તે કામસઙ્ગે ।
અસત્યાં મનઃ! કલ્પનાં માઽઽશ્રયસ્વ,  મનઃ! સજ્જન! ન્યુષ્યતાં સાધુસઙ્ગે ॥ ૧૨૮ ॥

સુગત્યૈ સતાં સઙ્ગતિર્હ્યત્યવશ્યા  તયા દુર્મતિઃ સન્મતિત્વં વૃણોતિ ।
અનઙ્ગઃ સ કામઃ ખલો વઞ્ચકશ્ચ  તતો રે! ત્વયા નિર્વિકારેણ ભાવ્યમ્ ॥ ૧૨૯ ॥

કુસઙ્કલ્પલેશોઽપિ હેયઃ સદૈવ  મનઃ સત્યસઙ્કલ્પ એવાવલમ્બ્યઃ ।
જહીહ્યઞ્જસા જલ્પનં નિષ્ફલં ચ  રમાકાન્તમેકાન્તકાલે ભજસ્વ ॥ ૧૩૦ ॥

મનો! ભક્તિયોગ્યસ્ત્વસૌ રામ એકઃ,  પ્રસિદ્ધો ભુવિ હ્યેકબાણૈકશબ્દઃ ।
જનોદ્ધારકર્ત્રી ક્રિયા દૃશ્યતેઽસ્ય  વિવેકં જના! રાઘવસ્યાશ્રયધ્વમ્ ॥ ૧૩૧ ॥

વિચાર્યૈવ યો ભાષતે વર્તતે ચ  ભવોત્તાપશાન્ત્યૈ સદા તસ્ય સઙ્ગઃ ।
ન ભાષસ્વ સમ્યગ્વિમર્શં વિના ભો!  સદા ભાષણં વર્તનં તેઽસ્તુ શુદ્ધમ્ ॥ ૧૩૨ ॥

વિરક્તશ્ચ વિજ્ઞાનવાનીશભક્તઃ  કૃતો નિશ્ચયો યેન ચ સ્વાત્મબોધે ।
સુપુણ્યં હિ તદ્દર્શનસ્પર્શલભ્યં  તદીયઃ સુબોધશ્ચ શઙ્કાપહારી ॥ ૧૩૩ ॥

અહઙ્કારશૂન્યશ્ચ નિત્યં વિરક્તો  દયાશાન્તિયુક્તઃ ક્ષમી નિત્યદક્ષઃ ।
અલુબ્ધશ્ચ યઃ ક્ષોભદૈન્યપ્રમુક્તો  મનો! ઽસાવભિજ્ઞાયતાં યોગિરાજઃ ॥ ૧૩૪ ॥

મનઃ! સેવ્યતાં ભદ્ર! સત્સઙ્ગતિઃ સા  નિવર્ત્ત્યાશુ યા દુર્મતિં સ્વપ્રભાવાત્ ।
સુમાર્ગં પ્રતિ પ્રેરયત્યાદરેણ  ભિયાપેતિ યસ્યાઃ કરાલોઽપિ કાલઃ ॥ ૧૩૫ ॥

---

નિધિર્જ્ઞાયતેઽહન્તયા નો પુરાણઃ
ભયવ્યાપ્તમેતદ્ધિ વિશ્વં સમસ્તં  ભયાતીતમાનન્દમાસ્વાદયસ્વ ।
તદાલોકનાન્નશ્યતિ દ્વૈતભાવઃ  પ્રમુક્તસ્તતો નિર્ભયત્વં પ્રભુઙ્ક્તે ॥ ૧૩૬ ॥

હિતં બોધિતં સાધુભિઃ સ્પષ્ટશબ્દૈઃ  સ્થિતઃ પૂર્વવન્મન્દબુદ્ધિસ્તુ લોકઃ ।
વિહાતું ન દેહાત્મબુદ્ધિં ક્ષમોઽસૌ  નિધિર્જ્ઞાયતેઽહન્તયા નો પુરાણઃ ॥ ૧૩૭॥

અલભ્યં ભ્રમાદ્ ભૂનિખાતં હિ વિત્તં  તથા જન્મદૈન્યં ગતો જીવ એષઃ ।
ન સન્ત્યજ્યતે નિશ્ચયો દેહબુદ્ધે-  ર્નિધિર્જ્ઞાયતેઽહન્તયા નો પુરાણઃ ॥ ૧૩૮॥

સ્થિતો વિશ્વતો વિશ્વનાથઃ સ નૂનં  શિલાં મન્યતે દુર્ભગસ્તસ્ય મૂર્તિમ્ ।
ન પુણ્યં સમાપ્નોતિ ના ભાવહીનો  નિધિર્જ્ઞાયતેઽહન્તયા નો પુરાણઃ॥ । ૧૩૯॥

નિધેર્વઞ્ચિતઃ સન્નિધિસ્થાત્ સ્વકીયા-  ન્નિબદ્ધો ગુણૈર્દુઃખમગ્નઃ સ જીવઃ ।
ક્ષમો લઙ્ઘિતું તત્રયં ન સ્વવૃત્ત્યા  નિધિર્જ્ઞાયતેઽહન્તયા નો પુરાણઃ ॥ ૧૪૦॥

અતો જ્ઞાનિસાધું જનેઽન્વિષ્ય તસ્ય  દૃઢં ધાર્યતાં પાદયુગ્મં કૃપાર્થમ્ ।
વિના સદ્ગુરોરઞ્જનં સર્વથૈવ  નિધિર્જ્ઞાયતેઽહન્તયા નો પુરાણઃ ॥ ૧૪૧॥

ન તજ્જ્ઞાયતે, જ્ઞાયતે નાત્મરૂપં  હ્યહન્તા ન વિસ્રંસતે સ્રંસતે ન ।
હૃદો હન્ત! નાપૈતિ નાપૈતિ શઙ્કા  વિનાતિશ્રમૈર્નાપ્યતે નાપ્યતે તત્ ॥ ૧૪૨॥

નરો નાભિજાનાતિ માયાભ્રમાદ્યદ્  હિતાત્ સર્વથા વઞ્ચ્યતેઽસૌ સ્વકીયાત્ ।
પરીક્ષાં વિનોદ્દીપ્તમાયાવિમુદ્રાં  કટૌ સન્નિબદ્ધન્નિવૈષોઽતિમૂઢઃ ॥ ૧૪૩॥

---

મનોઽનન્તસદ્ મૃગ્યતાં તત્ પ્રયત્નૈઃ
જગત્યસ્તિ કિં સત્યમિત્યાદરેણ  મનોઽન્વિષ્યતાં સર્વશક્યપ્રયત્નૈઃ ।
મનો! ઽસ્મિન્ પ્રયાસે પ્રતીયેત દેવો  ભ્રમાજ્ઞાનશઙ્કાતમઃ સ્યાન્નિરસ્તમ્ ॥ ૧૪૪॥

સદા ચિન્તયન્નિન્દ્રિયાર્થાનહન્તાઽઽ-  વૃતો જાયતે જન્તુરજ્ઞાનયોગાત્ ।
વિવેકેન સમ્પ્રાપ્નુયાદ્ રે! સ્વરૂપં  તતો નૈવ જીવઃ પુનર્જન્મ યાતિ ॥ ૧૪૫॥

ઇદં દૃશ્યમાનં ન જીવેચ્ચિરાય  ભિનત્તિ હ્યકસ્માત્ સ કાલઃ સમૂર્તમ્ ।
વિનઙ્ક્ષ્યત્યશેષં ચ કાલે સમસ્તં  મનો!ઽનન્તસદ્ મૃગ્યતાં તત્ પ્રયત્નૈઃ ॥ ૧૪૬॥

ન તચ્છિદ્યતે ભિદ્યતે નિર્વિકારિ  જગદ્વ્યાપ્યગમ્યં હ્યહમ્ભાવયોગાત્ ।
ક્ષમં તન્ન સોઢં મનાગ્ દ્વૈતભાવં  મનો! ઽનન્તસદ્ મૃગ્યતાં તત્ પ્રયત્નૈઃ ॥ ૧૪૭॥

નિરાકાર આધારભૂતો વિધેર્ય-  સ્તથેશાન્તરાણામગમ્યઃ શ્રુતીનામ્ ।
સખે! તેન સાર્ધં ત્વયાપ્તવ્યમૈક્યં  મનો!ઽનન્તસદ્ મૃગ્યતાં તત્ પ્રયત્નૈઃ ॥ ૧૪૮॥

ન શક્નોતિ યત્ પ્રેક્ષિતું ચર્મચક્ષુ-  ર્ન યસ્ય દ્યુતિં મૃષ્યતિ જ્ઞાનચક્ષુઃ ।
યદીક્ષાક્ષણે લુપ્યતીક્ષાક્રિયૈવ  મનો!ઽનન્તસદ્ મૃગ્યતાં તત્ પ્રયત્નૈઃ ॥ ૧૪૯॥

ન પીતં, ન નીલં, સિતં શ્યામલં વા,   ન તદ્ વ્યક્તમવ્યક્તરૂપં ન નૂનમ્ ।
સવિશ્વાસભક્ત્યા સુલભ્યં પદં યદ્, મનૌ!ઽનન્તસદ્ મૃગ્યતાં તત્ પ્રયત્નૈઃ ॥ ૧૫૦ ॥

---

સમાધાનસૌખ્યં સતાં સઙ્ગતેન

મનો! માર્ગણાદ્ માર્ગણાત્ સત્યબોધો,   મનો! બોધનાત્ બોધનાત્ સત્યલાભઃ ।
સમસ્તં ત્વિદં સઙ્ગતેઃ સજ્જનાનાં,   સ્થિરાન્નિશ્ચયાત્ સા ચ લભ્યાનુરાગાત્ ॥ ૧૫૧ ॥

વૃથા ચાતુરી શાબ્દિકજ્ઞાનબોધ-   ક્રિયાયાં, હિ તન્નિર્ણયોઽન્તસ્ત્વવશ્યઃ ।
મનસ્! તત્ત્વસારં સ્થિતં હ્યન્યદેવ,   સમસ્તેષ્વનુસ્યૂતમત્યુત્તમં ચ ॥ ૧૫૨ ॥

નરે! પિણ્ડતત્ત્વાઽઽદિવિજ્ઞાનતો વા,   ન નીતેઃ પટુત્વાત્ સમાધાનસૌખ્યમ્ ।
ન વા યોગયાગૈર્ન વા ત્યાગભોગૈ-   ર્મનસ્! તત્ પરં સાધુસઙ્ગેન લભ્યમ્ ॥ ૧૫૩ ॥

યથાઽઽલક્ષતે પ્રોજ્ઝ્ય નિર્દિષ્ટશાખાં,   દિદૃક્ષુર્નભોમણ્ડલે તં નવેન્દુમ્ ।
વિહાય શ્રુતં સાધુસઙ્ગે તથૈવ,   મહાવાક્યતત્ત્વાદિ પશ્યેત્ સ્વરૂપમ્ ॥ ૧૫૪ ॥

તદન્વિષ્યતાં દૃશ્યતે યન્ન લોકે,   મનસ્! તદ્ધિ સાધો! નિગૂઢં નિતાન્તમ્ ।
કરગ્રાહ્યતાં નૈતિ તદ્ભોઃ! કદાપિ,   જગદ્વ્યાપ્નુવચ્ચાપિ નાઽઽકલ્યતે તત્ ॥ ૧૫૫ ॥

---

મનઃ! સ્થીયતાં પ્રોજ્ઝ્ય સર્વામહન્તામ્

પ્રશંસન્નિજજ્ઞાનિતાં મૂર્ખ એવ,   હ્યતર્ક્યં પ્રભું તર્કયેત્ કો જગત્યામ્ ।
સહાહન્તયા લક્ષિતું તં ત્વશક્યં,   તમાલક્ષમાણસ્તદૈક્યં સમેતિ ॥ ૧૫૬ ॥

ગવેષાર્હશાસ્ત્રાણિ નૈકાનિ નૂનં,   પરં ધારયન્ત્યૈકમત્યં ન તાનિ ।
કલિં કુર્વતે સ્વસ્વશાસ્ત્રાભિમાનાત્   પ્રવીણાઃ, તતો રુધ્યતે હ્યાત્મબોધઃ ॥ ૧૫૭ ॥

મનો! ન્યાયતર્કાદિશાસ્ત્રાણિ વેદાઃ,   શ્રુતિશ્ચ સ્મૃતિર્ભિન્નમાર્ગાન્ દિશન્તિ ।
સ્વયં હ્યેષ મૌનં સમેત્ય સ્થિતોઽસૌ,   મનઃ! સ્થીયતાં પ્રોજ્ઝ્ય સર્વામહન્તામ્ ॥ ૧૫૮ ॥

અહન્તાકૃતિં મક્ષિકાં ભક્ષયિત્વા,   રુચિઃ સ્યાદ્ મહાબોધનાસ્વાદને કિમ્ ।
અહન્તા ન યન્માનસાત્ સમ્પ્રણશ્યેત્,   તદન્તઃ પ્રપચ્યેત ન જ્ઞાનબોધઃ ॥ ૧૫૯ ॥

મનો! ઽલં વિષાદાન્તવાદેન તાવત્   વિકારપ્રસૂભેદબુદ્ધ્યા કૃતં ચ ।
મનો! મા સખે! બોધયાન્યાંસ્તુ તાવદ્,   ન યાવત્તવ સ્યાદહન્તા વિલુપ્તા ॥ ૧૬૦ ॥

અહન્તા સદા દુઃખમેવ પ્રસૂતે।   ક્રિયાહાનિબોધઃ ફલં નાતનોતિ ।
સુખં ત્વાન્તરં સર્વસૌખ્યં પ્રદત્તે,   વિમૃગ્ય વ્યપોહ સ્વયં તામહન્તામ્ ॥ ૧૬૧ ॥

વિવેકી નરોઽહન્તયાપૈતિ નીતેઃ,   અનીત્યા ચ સ શ્લાઘ્યતામેતિ લોકે ।
પરં સોઽન્તરાપ્નોતિ સમ્યક્ પ્રતીતિં   યદાચાર આલમ્બિતોઽસ્ત્યપ્રમાણઃ ॥ ૧૬૨॥

---

સત્સઙ્ગે દેહબુદ્ધિઃ આત્મબુદ્ધૌ પરિવર્તયિતવ્યા
પ્રસક્તો દૃઢં નિશ્ચયે દેહબુદ્ધેઃ   સુખાદ્ વઞ્ચ્યતે ના સ્વદેહાદતીતામ ।
પરીવર્ત્ય બુદ્ધિં તનોરાત્મબુદ્ધૌ,   સદાશ્રીયતાં સઙ્ગતિઃ સજ્જનાનામ્ ॥ ૧૬૩॥

મનઃ ।
કલ્પિતસ્ત્યજ્યતામિદ્રિયાર્થો,   હ્યભિજ્ઞાયતાં નિર્ગુણો દેવ એકઃ । મનઃ ।
કલ્પના રુધ્યતાં પ્રોત્થિતૈવ   સદાશ્રીયતાં સઙ્ગતિઃ સજ્જનાનામ્ ॥ ૧૬૪॥

વહન્ દેહગેહાદિ ચિન્તામખણ્ડં,   નરોઽત્યન્તલુન્ધો હિતં સ્વં હિનસ્તિ ।
હરિં ચિન્તયન્ મુક્તિકાન્તા વૃણીયાત્,   સદાશ્રીયતાં સઙ્ગતિઃ સજ્જનાનામ્॥ ૧૬૫॥

અહન્તા પ્રવૃત્તા સ્વદેહાત્ પ્રવૃદ્ધા,   પ્રિયાપુત્રમિત્રાદિમોહાદ્, ભ્રમાય ।
ત્યજૈનાં દ્રુતં જન્મમૃત્યુપ્રમુક્ત્યૈ,   સદાશ્રીયતાં સઙ્ગતિઃ સજ્જનાનામ્ ॥ ૧૬૬॥

---

સગુણનિર્ગુણાતીતં શુદ્ધસ્વરૂપમ્
મનઃ! શાશ્વતે સ્થાતુમાદ્યાત્મરૂપે,   સખે! નિશ્ચિનુ દ્રાગ્ વ્યપોહ્ય સ્વશઙ્કાઃ ।
હિતાર્થં ક્ષણો યુજ્યતાં સર્વ એવ,   સદાશ્રીયતાં સઙ્ગતિઃ સજ્જનાનામ્ ॥ ૧૬૭॥

સ્વવૃત્ત્યાત્મરૂપે સ્થિરં વિદ્ધિ સાધું,   ય આશાવિહીનત્વયોગાદદીનઃ ।
મનો! બન્ધનં વર્ધયન્ દેહબુદ્ધિં,   કથં સજ્જનોપદ્રવાય ક્ષમેત? ॥ ૧૬૮॥

સતામગ્રતોઽનન્તપૃચ્છાં વિદધ્યા-   ન્નિરસ્યેદહન્તાં પ્રવિસ્તારિતાં ચ ।
અશેષસ્મૃતિં દેહબુદ્ધેર્વિલોપ્ય,   મનશ્! ચિન્ત્યતાં નિર્ગુણં શુદ્ધતત્ત્વમ્ ॥ ૧૬૯॥

ત્યજેદાત્મબોધેન રે! દેહબુદ્ધિં,   વિવેકેન સમ્પ્રાપ્યતાં વસ્તુ તચ્ચ ।
ન વૃત્ત્યા સ્થિરીભૂયતે બ્રહ્મણીતિ,   તદેવાનુસન્ધીયતાં સર્વકાલમ્ ॥ ૧૭૦॥

મનશ્! ચર્મચક્ષુષ્પથાત્ સર્વસારં,   સુગુપ્તં, સ આભાસ ઈક્ષાપથે યદ્ ।
ન ચાઽઽકલ્પ્યતે તદ્ગુણાભાસશૂન્યં   હ્યહન્તાગુણાત્ કલ્પનાયા અગમ્યમ્ ॥ ૧૭૧॥

મનો! દ્યોતયન્તીન્દ્રિયાર્થાંસ્ત્વવિદ્યા   સુવિદ્યા ચ સા બ્રહ્મબોધોપકર્ત્રી ।
દ્વિરૂપાસ્તિ સા કલ્પના; નિર્મલાન્તે,   વિવેકેન સંલીયતે બ્રહ્મરૂપે ॥ ૧૭૨॥

અહઙ્કારરાહુઃ સ્વરૂપોત્થિતોઽસૌ,   સ્થિતો વ્યાપ્ય તદ્ બ્રહ્મરૂપાન્તરિક્ષમ્ ।

દિશો ધ્વાન્તમેઘાવૃતા દુર્નિરીક્ષ્યા,   વિચાર્યાપ્યતાં બ્રહ્મ તદ્ રે! વિવેકાત્ ॥ ૧૭૩ ॥

ન શક્નોતિ યં લક્ષિતું ચર્મચક્ષુ-   ર્શેષં ભવં યશ્ચ પશ્યત્યરુદ્ધમ્ ।
દદાત્યેષ નૂનં ક્ષયાતીતમોક્ષં,   સદા ભક્તપક્ષાનુકૂલશ્ચ દક્ષઃ ॥ ૧૭૪ ॥

---

દેવાધિદેવઃ - કેવલં બ્રહ્મ
વિધાત્રા વિધિર્લિખ્યતે સર્વભાલે,   વિધિસ્તદ્વિધાતુર્લલાટે તુ કેન ।
જગદ્ દહ્યતેઽન્તે સમસ્તં હરેણ,   હરોઽસૌ પરં દહ્યતેઽન્તે તુ કેન ॥ ૧૭૫ ॥

અથ દ્વાદશાર્કાશ્ચ રુદ્રા દશૈકાઃ,   અગણ્યા અસઙ્ખ્યાકશક્તાશ્ચ નૂનમ્ ।
સ સર્વેશ્વરઃ કીદૃશઃ કસ્તથેતિ,   વિના સશ્રમાન્વેષણાજ્જ્ઞાયતે ન ॥ ૧૭૬ ॥

ન વિચ્છિદ્યતે ભિદ્યતે દેવરાજઃ,   સ્થિરો નિશ્ચલો દૈન્યહીનો બલિષ્ઠઃ ।
અહન્તાપ્રભાવાત્ ક્ષમં નેક્ષિતું તં,   સખે! ચર્મચક્ષુઃ; સ તિષ્ઠત્યગમ્યઃ ॥ ૧૭૭ ॥

પ્રિયો યસ્ય યઃ સોઽર્ચ્યતે તેન દેવઃ,   પરં કોઽપિ નાન્વિષ્યતીશં તમેકમ્ ।
અહો! કોટિશો દૃક્પથં યાન્તિ દેવાઃ,   પ્રિયા યસ્ય યા હ્યુત્તમા સૈવ ભક્તિઃ ॥ ૧૭૮ ॥

ત્રિલોકી યતો નિર્મિતા તં યથાર્થં,   ન કોઽપિ સ્તવીતીશ્વરં હ્યેકમાનમ્ ।
મનુષ્યાક્ષિમાર્ગાદતીતઃ સ ગુપ્તો,   વિના સદ્ગુરોઃ સુપ્રસાદં ન દૃશ્યઃ ॥ ૧૭૯ ॥

---

દામ્ભિકાઃ ગુરવઃ ત્યાજ્યાઃ; સદ્ગુરુઃ આશ્રયિતવ્યઃ
ગુરુઃ કોટિશો લભ્યતે માર્ગણાન્તે,   હ્યનેકાશ્ચ મન્ત્રા, મહાંસ્તત્પ્રભાવઃ ।
સકામેષુ રે! સાભિચારેષુ, તેષુ,   ગુરુષ્વસ્તિ નૈકોઽપિ તે મુક્તિદાતા ॥ ૧૮૦ ॥

અભક્તોઽભિચારી પરાર્થાપહારી,   મનો! દુર્ગુણોન્મત્તતાપપ્રદશ્ચ ।
તથા દામ્ભિકો નિન્દકો મત્સરી ચ,   ન સાધુઃ, સ તુ જ્ઞાનિનામપ્યગમ્યઃ ॥ ૧૮૧ ॥

ન રે! સદ્ગુરુઃ કામનાસક્ત ઇષ્ટઃ   ક્રિયાહીનવાચાલતાયાં પટુશ્ચ ।
સદા વર્તતે યસ્તુ વાચોઽનુસારં,   તમેવાદરાત્ સદ્ગુરું માર્ગયસ્વ ॥ ૧૮૨ ॥

મનો! જ્ઞાનવૈરાગ્યભક્ત્યન્વિતશ્ચ,   વિવેકી ચ યોગી ક્ષમાવાન્ કૃપાલુઃ ।
સમર્થશ્ચ ચાતુર્યયુક્તશ્ચ વિદ્વાન્,   સમાધાનદઃ સદ્ગુરુર્માર્ગિતવ્યઃ ॥ ૧૮૩ ॥

---

નિઃસઙ્ગવૃત્ત્યા દેવાધિદેવઃ ભજનીયઃ
અસન્ માયયાપ્નોત્ સતસ્તાત! ભાવમ્,   ઇતિ જ્ઞાનબોધઃ સદુક્તેરુદેતિ ।

અનિર્વાચ્યમત્યુચ્યતાં બોધનાર્થં,   મનો! ઽનન્ત સન્ ,-મૃગ્યતાં સન્તતં તત્ ॥ ૧૮૪ ॥

મનો! ભીતિચિન્તાવિહીનાત્મરૂપે,   સદાઽઽચ્છાદયાત્માનમત્યાદરેણ ।
મનો! દૃક્પથં નૈતિ રામઃ સલોકે,   સદૈક્યાત્ કદાપ્યાત્મનો નૈષ ભિન્નઃ ॥ ૧૮૫ ॥

સમીપસ્થ એવાસ્તિ રામઃ સદૈવ,   મનો!' મૃગ્યતાં હે સખે! સત્યમેતત્ ।
તવાખણ્ડયોગસ્તુ રામેણ સાર્ધં,   વિયોગપ્રસૂં તાં ત્યજ દ્રાગહન્તામ્ ॥ ૧૮૬ ॥

મનો! બ્રહ્મપિણ્ડાણ્ડયોરૈક્યભાવ-   સ્તતો વસ્તુ તદ્ ભિન્નમેવાસ્તિ નૂનમ્ ।
મનો! ભાસમાનં સમસ્તં પ્રપશ્યેત્,   સુખેનેહ તિષ્ઠેત્તુ નિઃસઙ્ગવૃત્ત્યા ॥ ૧૮૭ ॥

જહિ જ્ઞાનશસ્ત્રેણ રે! દેહભાવં,   વિદેહસ્થિતૌ યાહિ ભક્તેઃ પથૈવ ।
વિરક્ત્યાશ્રયાત્ સર્વનિન્દ્યં જહીહિ,   મનસ્! તિષ્ઠ નિઃસઙ્ગવૃત્ત્યા સુખેન ॥ ૧૮૮ ॥

અભિજ્ઞાયતાં ભૂવિનિર્માતૃદેવો,   વિલોક્યૈવ તં મુચ્યતે મર્ત્યજીવઃ ।
ગુણાતીતમેનં ગુણાઢ્યં ભજસ્વ,   પરં તિષ્ઠ નિઃસઙ્ગવૃત્ત્યા સુખેન ॥ ૧૮૯ ॥

ન કર્તા ન ભર્તાપિ સૃષ્ટેઃ સ દેવઃ,   પરાવાગતીતઃ સ માયાવિહીનઃ ।
મનો! નિર્વિકલ્પં સદા ચિન્તયૈનં,   પરં તિષ્ઠ નિઃસઙ્ગવૃત્ત્યા સુખેન ॥ ૧૯૦ ॥

ન શક્નોતિ યો દેહબુદ્ધિં વિહાતું,   સ ન જ્ઞાનબોધક્ષમઃ સર્વથૈવ ।
પરબ્રહ્મ નાઽઽકલ્યતેઽહન્તયા ચ,   કદાપ્યેતિ નાજ્ઞાનપુઞ્જો વિનાશમ્ ॥ ૧૯૧ ॥

મનો નિશ્ચલં યસ્ય રૂપં હ્યબોધ્યં,   સ સર્વોત્તમો ધ્યેય ઐક્યસ્ય યોગાત્ ।
તદર્થં તુ સર્વોપમા નૂનમૂના,   સ નિઃસઙ્ગતાઃસઙ્ગતાતીત એવ ॥ ૧૯૨ ॥

સુબોધ્યો ન દેવો, હ્યબોધ્યોઽપિ નૈવ,   ન શક્યઃ સ્તવો વેદશાસ્ત્રૈશ્ચ તસ્ય ।
અદૃશ્યો ન, દૃશ્યો ન, સદ્યુગ્મસાક્ષી,   તદન્તો ન ગમ્યો ન ગમ્યઃ શ્રુતીનામ્ ॥ ૧૯૩ ॥

'વસન્નન્તરે કીદૃશો દેવ ?' ઇત્યા-   નતઃ પૃષ્ટવાન્ સાધકોઽત્યાદરેણ ।
'તનું પ્રોજ્ઝ્ય દેવો વસત્યેષ કુત્ર?   વિશત્યેષ દેહાન્તરં કિં પુનશ્ચ' ॥ ૧૯૪ ॥

'હૃદિસ્થં વિજાનીહિ તં દેવમેવં   સ્થિતો વ્યાપ્ય વિશ્વં નભોવત્ સ સર્વમ્ ।
સ સર્વત્ર, નાયાતિ વા યાતિ નૂનં,   ન રિક્તં સ્થલં તં વિના કિઞ્ચિદસ્તિ ॥ ૧૯૫ ॥

'અસૌ સઞ્ચરત્યન્તરાલેઽણુમાત્રે,   હ્યનુસ્યૂત આસ્તે ન કિઞ્ચિદ્વિના તમ્ ।
સ્વયં યાતિ તાદાત્મ્યતાં દ્રષ્ટુકામો,   લયં ચ ત્રયં દર્શન-દ્રષ્ટ-દૃશ્યમ્ ॥ ૧૯૬ ॥

'નભઃસન્નિભં રાઘવસ્યાસ્ય રૂપં,   સદા ધ્યાયતો જન્મનિર્મૂલનાય ।
ન તદર્શનાદ્ દેહભાવાવશેષ-   શ્ચિરાયોપભુક્ત્વાપિ તન્નૈવ તૃપ્તિઃ ॥ ૧૯૭ ॥

'નભોવ્યાપ્ય સૃષ્ટિં સમસ્તાં સ્થિતં તુ, યથાર્થોપમા નૈવ તદ્ રાઘવાર્થમ્ ।
સ્વભાવાદસૌ સર્વમેવાદ્વિતીયઃ, કથં વ્યાપકાખ્યા તદીયોચિતા સ્યાત્ ॥ ૧૯૮॥।

'પુરાણા'તિવિસ્તીર્ણરૂપં વિબોદ્ધું, ન તે તર્કસમ્પર્કલેશોઽપિ શક્તઃ ।
તદત્યન્તગૂઢાદ્વિતીયં; પ્રભાવાત્, પરં સદ્ગુરોર્દ્રાક્ સુબોધ્યાનુભવ્યમ્ ॥ ૧૯૯॥

'તદાકલ્યતે જ્ઞાનબોધાત્ સ્વરૂપં તદા સર્વસાક્ષિત્વમસ્તં પ્રયાતિ ।
ઉદેત્યુન્મનસ્ત્વં ચ વાચો નિરોધઃ, પ્રતીતિશ્ચ યત્, સર્વતો રામ એવ ॥ ૨૦૦॥

'અભિજ્ઞાત આધ્યાત્મરૂપે દ્વિતીયં, ન સન્દૃશ્યતે તદ્દૃતે ચિન્ત્યતે ન ।
ચિરાદ્ મીલનં સાત્મરૂપં ચ લબ્ધ્વા, વિદેહસ્થિતેર્દેહતાપઃ પ્રશાન્તઃ ॥ ૨૦૧॥

---

સાધ્યં ભૂત્વા સાધનં કુર્યાત્
મનો! યદ્યપીદં ત્વયાપ્તં સુગુહ્યં, સ્થિરીકર્તુમન્તઃપ્રયત્નોઽત્યવશ્યઃ ।
સદા તત્ત્વમાકર્ણ્ય તે નિશ્ચયઃ સ્યાત્, સતાં સઙ્ગ આશ્રીયતાં ધન્યતાયૈ ॥ ૨૦૨॥

મનો! ભદ્ર! સઙ્ગં સમસ્તં વિજહ્યાત્ સતામાશ્રયેતાઞ્જસાત્યાદરેણ ।
વિમુચ્યેત જન્મોગ્રદુઃખાદ્, યતોઽન્યદ્, વિના સાધનં, પ્રેરિતઃ સત્પથે ના ॥ ૨૦૩॥

મનઃ! સર્વસઙ્ગાંશ્છિનત્ત્યેષ સઙ્ગો મનઃ! પ્રાપયત્યેષ મોક્ષં ચ સદ્યઃ ।
મનઃ! સાધકં તારયત્યેષ શીઘ્રં, મનો! દ્વૈતમેષ હ્યશેષં ભિનત્તિ ॥ ૨૦૪॥

---

ફલશ્રુતિઃ
મનોબોધમાકર્ણ્ય દોષઘ્નમેનં, નરઃ સાધનાર્હો ભવેદ્ મન્દબુદ્ધિઃ ।
શનૈર્જ્ઞાનવૈરાગ્યસામર્થ્યવાંશ્ચ, દૃઢં ચાત્ર વિશ્વસ્ય ભુઞ્જીત મોક્ષમ્ ॥ ૨૦૫॥

Encoded and proofread by Sunder Hattangadi

---

*Manobodha 2*

pdf was typeset on September 17, 2023

Please send corrections to *sanskrit@cheerful.com*